# Shri Badrinarayana Stotram

# श्रीबद्रीनारायणस्तोत्रम्

## Document Information

Text title : Shri Badrinarayana Stotram

File name : badrInArAyaNastotram1.itx

Category : vishhnu, shrIdharasvAmI, stotra, panchaka

Location : doc_vishhnu

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

# श्रीबद्रीनारायणस्तोत्रम्

(भुजङ्गप्रयातवृत्त)
तपस्वी प्रभुः पूर्णवैराग्य दीप्तो
निजानन्द सन्देहतृप्तो वरेण्यः ।
चिदानन्दरूपेण राराजते यः
त्रिलोकीगुरुं नौमि नारायणं तम् ॥ १॥

भवब्धौ निमग्नान् विमुढांश्च दीनान्
चिदानन्दशुद्धाद्वयं ब्रह्मसौख्यम् ।
प्रबोधाय भूमापि योऽत्रावतीर्णः
त्रिलोकीगुरुं नौमि नारायणं तम् ॥ २॥

सृजन् स्वोरुतश्चोर्वशीनां समूहं
बभूवात्र यः शक्रगर्वापहारी ।
महाद्दप्तकन्दर्पदर्पापहर्ता
त्रिलोकीगुरुं नौमि नारायणं तम् ॥ ३॥

“स्वलक्ष्मीं त्यजन् दीनरक्षाकथं स्यात्”
न भूयात्स्वशङ्कावृतो भक्तवृन्दः ।
तदार्थं य आस्ते कुबेरं गृहित्वा
त्रिलोकीगुरुं नौमि नारायणं तम् ॥ ४॥

निजेऽस्मिन्नमायेति सन्दर्शनाय
नलक्ष्म्या युतो योऽत्र भक्तार्तिहन्ता ।
स्वरूपं दिशन्तं परं ब्रह्मशान्तं
त्रिलोकीगुरुं नौमि नारायणं तम् ॥ ५॥

गुरुनारायणस्तोत्रं यः पठेद्भक्तिसंयुतः ।
कामजित्स्तोत्र मुक्तश्च नारायणकृपावशात् ॥ ६॥

इति श्रीमत् परमहंसपरिव्राजकाचार्य सद्गुरू भगवान
श्रीधरस्वामीमहाराजविरचितं श्रीबद्रीनारायणस्तोत्रं सम्पूर्णम् ।

*Shri Badrinarayana Stotram*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*